## परावनुपात्यय इणः । (३८/३२१०)

परिशब्दे उपपदे इणो धातोः घञ् प्रत्ययो भवति, [1]अनुपात्यये गम्यमाने । क्रमप्राप्तस्यानतिपातोऽनुपात्ययः, [2]परिपाटी । [3]तव पर्यायः । मम पर्यायः । [4]अनुपात्यये इति किम् ? [5]कालस्य पर्ययः । अतिपातः इत्यर्थः ॥

## व्युपयोः शेतेः पर्याये । (३९/३२११)

वि उप इत्येतयोः उपपदयोः शेतेर्धातोः घञ्[6] भवति पर्याये गम्यमाने । तव विशायः । [7]मम विशायः । तव राजोपशायः[8] । तव राजानमुपशयितुं पर्यायः इत्यर्थः । पर्याये इति किम् ? विशयः । उपशयः ॥

## हस्तादाने चेरस्तेये । (४०/३२१२)

हस्तादाने गम्यमाने चिनोतेर्धातोः घञ् प्रत्ययो भवति, न चेत् [9]स्तेयं चौर्यं भवति । हस्तादानग्रहणेन प्रत्यासत्तिरादेयस्य लक्ष्यते । पुष्पप्रचायः । [10]फलप्रचायः । हस्तादाने इति किम्? वृक्षशिखरे फलप्रचयं करोति । अस्तेये इति किम् ? [11]फलप्रचयश्चौर्येण ।

[३०२] [12]उच्चयस्य प्रतिषेधो वक्तव्यः ॥

## निवासचितिशरीरोपसमाधानेष्वादेश्च कः । (४१/३२१३)

चेः इत्येव । निवसन्ति अस्मिन् इति निवासः । चीयतेऽसौ चितिः । [13]पाण्यादिसमुदायः शरीरम् । राशीकरणम् उपसमाधानम् । एतेष्वर्थेषु चिनोतेः घञ् प्रत्ययः भवति, [14]धातोरादेश्च ककार आदेशः । निवासे तावत् – [15]चिखल्लिनिकायः । [16]चितौ – आकायमग्निं चिन्वीत । [17]शरीरे – अनित्यकायः । उपसमाधाने – महान् गोमयनिकायः । एतेषु इति किम् ? चयः । इह कस्मान्न भवति महान् काष्ठनिचयः ? बहुत्वमत्र विवक्षितं नोपसमाधानम् ॥

## सङ्घे चानौत्तराधर्ये । (४२/३२१४)

चेः इत्येव । प्राणिनां [18]समुदायः सङ्घः । स च द्वाभ्यां प्रकाराभ्यां भवति । [19]एकधर्मसमावेशेन, [20]औत्तराधर्येण वा । तत्र औत्तराधर्यपर्युदासाद् इतरो गृह्यते । सङ्घे वाच्ये चिनोतेर्धातोः घञ् प्रत्ययो भवति आदेश्च कः । [21]भिक्षुकनिकायः । ब्राह्मणनिकायः । वैयाकरणनिकायः । अनौत्तराधर्ये इति किम् ? सूकरनिचयः । प्राणिविषयत्वात् सङ्घस्येह न भवति । कृताकृतसमुच्चयः । [22]प्रमाणसमुच्चयः ॥

---

1. अनुपात्ये फ. 2. परिपाटिः क. ड, क्रमप्राप्तस्य लंघनम् उपात्ययः इत्यधिकम् अ. 3. तव नास्ति अ. 4. अनुपात्ये फ. 5. अहो इत्यधिकम् फ. 6. प्रत्ययो इत्यधिकम् ब. फ. ड. 7. मम नास्ति फ. 8. मम राजोपशायः इत्यधिकम् अ. ब. क. ड. फ. ह. 9. स्तेयः ह. 10. पुष्पप्रचयं क. 11. फलप्रचयं चौर्येण करोति ब. 12. वार्तिकमिदं नास्ति फ. ह. 13. पाण्यादि – चितौ नास्ति ब. 14. धातो: नास्ति अ. क. फ. 15. चित्खिल्लिनिकायः फ, चिखिल्लिनिकायः अ. क, चिन्युल्लिनिकायः ह, चेखल्लिनिकायः ड. 16. चिति फ. 17. शरीरं फ. 18. समूहः अ. ड. 19. एकधर्मनिवेशेन अ. ड. 20. उत्तराधर्येण ह. 21. भिक्षुकनिकायः– प्रमाणसमुच्चयः नास्ति अ, भिक्षुकनिकायः नास्ति फ. 22. प्रमाणाप्रमाणसमुच्चयः क. फ. ह.